International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 77-78
© 2025 IJMH
www.themultijournal.com
Received: 07-08-2025
Accepted: 14-08-2025
Publish : 18-08-2025

**डॉ. श्रीविद्या सुब्रमणियन्**
BAMS, MD(Ayu)
प्राध्यापिका एवं विभागाध्यक्षा - संहिता एवं सिद्धान्त, संस्कृति-आयुर्वेदिक-चिकित्सालय-महाविद्यालयः, छाता, मथुरा-२८१४०१

**Correspondence:**
**डॉ. श्रीविद्या सुब्रमणियन्**
BAMS, MD(Ayu)
प्राध्यापिका एवं विभागाध्यक्षा - संहिता एवं सिद्धान्त,संस्कृति-आयुर्वेदिक-चिकित्सालय-महाविद्यालयः,छाता, मथुरा-२८१४०१

# आयुर्वेदे स्त्रीस्वास्थ्यं

**डॉ. श्रीविद्या सुब्रमणियन्**

**सारांशः**

आयुर्वेदः भारतीयानां प्राचीनः समग्रः चिकित्साशास्त्रः, यः शरीर-मनसोरात्मनः च स्वास्थ्यं सम्यग् रक्षति। स्त्रीणां जीवनम् अतीव विशेषतया रजःस्वला, गर्भिणी, प्रसूता, रजोनिवृत्ता इत्यादि अवस्थाभिः विशिष्टं भवति। एतेषु अवस्थासु शारीरिकं मानसिकं च परिवर्तनं भवति। आयुर्वेदः आहारविहार-चिकित्साभिः, ओषधिभिः, योगप्राणायामाभ्यां च स्त्रीस्वास्थ्यस्य विशेषं संवर्धनं करोति। अस्मिन् प्रबन्धे स्त्रीणां आरोग्याय आयुर्वेदेन निर्दिष्टाः उपायाः विवेच्यन्ते।

**कूटशब्दाः**

स्त्रीस्वास्थ्यं, आयुर्वेदः, आहारविहारः, योगः, ओषधयः, रजोनिवृत्तिः

**भूमिका**

भारतीयसंस्कृतेः दृष्ट्या स्त्रीणां स्थानं परमं पूजनीयम्।

**"न गृहं गृहमित्याहुः गृहणी गृहमुच्यते।**
**गृहं हि गृहिणीहीनं अरण्यं सदृशं मतम्॥"**
**शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्।**
**न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ॥** मनुस्मृति ३॥ ५७/

यत्र जामयः शोचन्ति तत् कुलम् आशु विनश्यति, यत्र तु एताः न शोचन्ति तत् हि सर्वदा वर्धते ।यस्मिन् कुटुम्बे स्त्रियः दुःखं प्राप्नुवन्ति तत् कुटुम्बं शीघ्रमेव नश्यति, यत्र स्त्रियः सुखिनः तिष्ठन्ति तत् कुटुम्बं सर्वदा समृद्धं, समृद्धं च तिष्ठति ।

मनुस्मृतौ अपि निर्दिष्टम् —

**"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥"**

अतः स्त्रीणां आरोग्यरक्षणं केवलं व्यक्तिगतसुखाय न, अपितु कुलसमाजस्य प्रगतये अपि अनिवार्यम्।

मुख्यविवेचनम्

**१. आयुर्वेदस्य सिद्धान्ताः स्त्रीस्वास्थ्ये**

आयुर्वेदः वातपित्तकफदोषसन्तुलनं स्वास्थ्यस्य मूलम् इति वदति। स्त्रीणां शरीरं प्रजननचक्रे, मातृत्वे, रजोनिवृत्तौ च बहुधा परिवर्तते। एतेषु अवस्थासु दोषसन्तुलनं रक्षणीयम्।

- वातसन्तुलनम् — अनियमितमासिकधर्मः, चिन्ता, निद्राभङ्गः, पाचनदोषः वातदुष्टेः परिणामः। उष्णाहारः, स्निग्धाहारः, विश्रान्तिः, ध्यानं च उपयुज्य वातः शम्यति।
- पित्तसन्तुलनम् — दाहः, आक्रोशः, अनिद्रा, रजोनिवृत्तिलक्षणानि च पित्तवृद्धिसम्बद्धानि। शीतलाहारः, ध्यातिः, शिरोधारा च हितकरम्।
- कफसन्तुलनम् — स्थूलता, आलस्यं, श्वासकष्टं, गर्भधारणसमस्या इत्यादि कफवृद्धेः। लघ्वाहारः, व्यायामः, योगः च उपयुज्यते।

**२. आयुर्वेदिकविधयः स्त्रीकल्याणाय**

- अभ्यङ्गः — उष्णतैलैः नित्यं स्वमालिशनं रक्तसञ्चारवर्धनाय, सन्धिस्वास्थ्याय, त्वचासुन्दर्याय च अत्यावश्यकम्।

- योगः प्राणायामश्च — "योगः कर्मसु कौशलम्" इति गीतावचनम्। योगाभ्यासः मासिकधर्मे ऐंठनं, गर्भावस्थायां पृष्ठवेदनां, रजोनिवृत्तौ मानसिकतापं च न्यूनीकरोति।

- ध्यानमनःसन्तोषः च — तनावेन सह संघर्षः स्त्रीणां सामान्यः। ध्यानं, मनःसन्तोषः च मानसिकशान्तिं, भावनात्मकसन्तुलनं च ददाति।

**३. औषधयः स्त्रीस्वास्थ्ये**

- शतावरी, अश्वगन्धा — प्रजननशक्तिवर्धनाय, हार्मोनसन्तुलनाय च।

- मेथीद्रव्यं — स्तन्यवर्धनाय।

- हरिद्रा, अदरकं — पाचनसुधाराय, शोथनिवारणाय।

- कैमोमील्, पुदीना — तनावशमनाय, निद्रासुखाय।

**४. आहारविहारः**

- संसाधिताहारपरिहारः (पिज्जा, बर्गरादयः)।

- शर्करा, कैफीनः च न्यूनतया सेवनम्।

- नित्यं पौष्टिकं आहारं — शाकफलवस्तूनि, दुग्धम्, सूपादयः।

- दिनचर्यायां पर्याप्तविश्रान्तिः, यथायोग्यव्यायामः च।

**५.परिहार्यानि आहारपदार्थानि**

संसाधितानि आहारपदार्थानि, अतिरिक्तशर्करा, कैफीनः च पाचन-वह्निं (अग्नि) बाधन्ते, वातस्य असन्तुलनं च वर्धयन्ति । जमेन वा अवशिष्टानि आहारपदार्थानि शरीरे अमा (विषाणि) वर्धयन्ति, मन्दपाचनं च कुर्वन्ति ।

आयुर्वेदः जीवनस्य प्रत्येकस्मिन् चरणे महिलानां समर्थनार्थं अनुकूलितं मार्गदर्शनं प्रदाति – मासिकधर्मचक्रस्य नियमनं, प्रजननशक्तिवर्धनं, रजोनिवृत्तेः मार्गदर्शनं वा। प्राकृतिकतालानां सम्मानं कृत्वा जीवनशैल्याः सन्तुलनं कृत्वा महिलाः जीवनशक्तिं भावनात्मकं कल्याणं च अनुभवितुं शक्नुवन्ति ।

**फलितम्**

आयुर्वेदः केवलं रोगनिवारणं न, अपि तु स्त्रीणां जीवनपर्यन्तं स्वास्थ्यसंरक्षणं करोति। आहार, विहार, औषधि, योग, ध्याना-दिभिः स्त्रीणां शारीरिक-मानसिकं सामर्थ्यं वर्धते।

**उपसंहारः**

आयुर्वेदिकदृष्ट्या प्रत्येकस्त्री अद्वितीया, तस्याः दोषप्रकृत्या अनु-सारं आरोग्यपरिचर्या अनुकूलनीया। स्त्रीस्वास्थ्ये आयुर्वेदः समग्रः मार्गः अस्ति, यः केवलं व्यक्तिगतं न, अपि तु पारिवारिकं सामा-जिकं च कल्याणं स्थापयति। एन सी आई एस एम / आयुष मन्त्रालयस्य मिशनं महिलानां स्वस्थं सन्तुलितं च जीवनं जीवितुं आवश्यकैः साधनैः सशक्तीकरणं भवति।

अतः युक्तमेव वदामः —

**आस्तां तावदियं प्रसूति समये दुर्वार शूल व्यथा**
**नैरुच्यं तनुशोषणं मलमयिशय्या च संवत्सरी।**
**एकस्यापि न गर्भभार भरण क्लेशस्य यस्यक्षमः**
**दातु निष्कृति उन्नतोऽपि तनयः तस्यै जनन्यै नमः॥**
**"नमो जनन्यै नमः सर्वनार्यै।**

**जयतु संस्कृतं, जयतु आयुर्वेदः॥"**

**सन्दर्भसूचिः**

१. आयुर्वेदीय प्रसूति-तन्त्रं स्त्रीरोगविज्ञानं च — प्रो. (कु.) प्रेमवती टिवारी।

२. मनुस्मृतिः (अंग्लभाषानुवादः — डॉ. सुरेन्द्र कुमार)।

३. मातृपञ्चकम् — रामकृष्ण मठः, त्रिश्शूर्।

४. Ayurvedic Research Blogs & Journals — https://www.ayurvedacollege.net/blogs/ayurveda-and-women-s-health-empowering-women-through-natural-healing।

५. JAIMS Journal — https://jaims.in/jaims/article/view/2772।

६. ISM Kerala Official Portal — https://www.ism. kerala. gov.in।

७. MedCrave Online Journal — https://medcraveonline.com/IJCAM/women-health- care-with-ayurveda.html।

८. अन्ये आयुर्वेदशास्त्र-धर्मशास्त्रप्रामाणिकस्रोतसः।